# श्रीगणेशायनम : । अस्य रामरक्षास्तोत्रमन्त्रस्य ।

श्रीगणेशायनम : ।
अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य ।
बुधकौशिक ऋषि : ।
श्रीसीतारामचंद्रो देवता ।
अनुष्टुप् छन्द : ।
सीता शक्ति : ।
श्रीमद्हनुमान् कीलकम् ।
श्रीसीतारामचंद्रप्रीत्यर्थे जपे विनियोग : ॥

॥ अथ ध्यानम् ॥

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं ।
पीतं वासोवसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ॥
वामाङ्कारूढ-सीता-मुखकमल-मिलल्लोचनं नीरदाभं ।
नानालङ्कारदीप्तं दधतमुरुजटामण्डनं रामचंद्रम् ॥
॥ इति ध्यानम् ॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥१ ॥
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।

जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥२ ॥
सासितूणधनुर्बाणपाणिं नक्तं चरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥३ ॥
रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघव : पातु भालं दशरथात्मज : ॥४ ॥
कौसल्येयो दृशौ पातु विश्वामित्रप्रिय : श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सल : ॥५ ॥
जिव्हां विद्यानिधि : पातु कण्ठं भरतवंदित : ।
स्कन्धौ दिव्यायुध : पातु भुजौ भग्नेशकार्मुक : ॥६ ॥
करौ सीतापति : पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रय : ॥७ ॥
सुग्रीवेश : कटी पातु सक्थिनी हनुमत्प्रभु : ।
ऊरू रघूत्तम : पातु रक्षःकुलविनाशकृत् ॥८ ॥
जानुनी सेतुकृत्पातु जङ्घे दशमुखान्तक : ।
पादौ बिभीषणश्रीद : पातु रामोऽखिलं वपु : ॥९ ॥
एतां रामबलोपेतां रक्षां य : सुकृती पठेत् ।
स चिरायु : सुखी पुत्री विजयी विनयी भवेत् ॥१० ॥
पातालभूतलव्योमचारिणश्छद्मचारिण : ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभि : ॥११ ॥
रामेति रामभद्रेति रामचंद्रेति वा स्मरन् ।
नरो न लिप्यते पापै : भुक्तिं मुक्तिं च विन्दति ॥१२ ॥
जगज्जेत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
य : कण्ठे धारयेत्तस्य करस्था : सर्वसिद्धय : ॥१३ ॥
वज्रपंजरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमंगलम् ॥१४ ॥
आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हर : ।
तथा लिखितवान् प्रात : प्रबुद्धो बुधकौशिक : ॥१५ ॥
आराम : कल्पवृक्षाणां विराम : सकलापदाम् ।
अभिरामस्त्रिलोकानां राम : श्रीमान् स न : प्रभु : ॥१६ ॥
तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।

पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥१७ ॥
फलमूलशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८ ॥
शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षः‌कुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥१९ ॥
आत्तसज्जधनुषा विषुस्पृशा वक्षया शुगनिषङ्ग सङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रत : पथि सदैव गच्छताम् ॥२० ॥
संनद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन् मनोरथोऽस्माकं राम : पातु सलक्ष्मण : ॥२१ ॥
रामो दाशरथि : शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थ : पुरुष : पूर्णः कौसल्येयो रघूत्तम : ॥२२ ॥
वेदान्तवेद्यो यज्ञेश : पुराणपुरुषोत्तम : ।
जानकीवल्लभ : श्रीमानप्रमेयपराक्रम : ॥२३ ॥
इत्येतानि जपेन्नित्यं मद्भक्त : श्रद्धयान्वित : ।
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशय : ॥२४ ॥
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नर : ॥२५ ॥
रामं लक्ष्मण-पूर्वजं रघुवरं सीतापतिं सुंदरं ।
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसंधं दशरथ-तनयं श्यामलं शान्तमूर्तिं ।
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥२६ ॥
रामाय रामभद्राय रामचंद्राय वेधसे ।
रघुनाथाय नाथाय सीताया : पतये नम : ॥२७ ॥
श्रीराम राम रघुनन्दन राम राम ।
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम ।
श्रीराम राम शरणं भव राम राम ॥२८ ॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि ।
श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि ।

श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥२९ ॥
माता रामो मत्पिता रामचन्द्रः।
स्वामी रामो मत्सखा रामचन्द्रः।
सर्वस्वं मे रामचन्द्रो दयालुर्।
नान्यं जाने नैव जाने न जाने ॥३० ॥
दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनंदनम् ॥३१ ॥
लोकाभिरामं रणरङ्गधीरं राजीवनेत्रं रघुवंशनाथम्।
कारुण्यरूपं करुणाकरन्तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥३२ ॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३३ ॥
कूजन्तं राम-रामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥३४ ॥
आपदामपहर्तारं दातारं सर्वसंपदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥३५ ॥
भर्जनं भवबीजानामर्जनं सुखसंपदाम्।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥३६ ॥
रामो राजमणि : सदा विजयते रामं रमेशं भजे।
रामेणाभिहता निशाचरचमू रामाय तस्मै नम :।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्।
रामे चित्तलय : सदा भवतु मे भो राम मामुद्धर ॥३७ ॥
राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥३८ ॥

इति श्रीबुधकौशिकविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ॥

Source: https://www.bharattemples.com/sri-ga%e1%b9%87esaya-nama/

Bharat Temples

Complete Bhajans Collections - Download Free Android App
https://play.google.com/store/apps/details?id=com.numetive.bhajans

Facebook: https://www.facebook.com/bharattemples/
Telegram: https://t.me/bharattemples
Youtube: https://www.youtube.com/channel/UC24oJCxZJyhhKzSUD-Lt9Tw